# श्री लळिता त्रिशतीस्तोत्रं

अथ ऋषिच्छन्दोन्यासानि अस्य श्री लळिता त्रिशती स्तोत्र महामन्त्रस्य भगवान् हयग्रीव ऋषिः अनुष्टुप्छन्दः श्री लळिता त्रिपुरसुन्दरी देवता, ऐं बीजं, क्लीं कीलकं, सौः शक्तिः सकल चिन्तितफलाव्याप्त्यार्त्थे जपे विनियोगः

अतिमधुरचापहस्तां
अपरिमितामोदबाणसौभाग्यां
अरुणामतिशयकरुणां
अभिनवकुलसुन्दरिं वन्दे!

Stotram

ककाररूपा कल्याणी कल्याणगुणशालिनी
कल्याणशैलनिलया कमनीया कलावती
कमलाक्षी कल्मषघ्नी करुणामृतसागरा
कदंबकाननावासा कदंबकुसुमप्रिया (1)

कन्दर्पविद्या कन्दर्प्पजनकापांगवीक्षणा
कर्प्पूरवीडिसौरभ्यकल्लोलितककुप्तटा
कलिदोषहरा कञ्जलोचना कम्रविग्रहा
कर्मादिसाक्षिणी कारयित्री कर्म्मफलप्रदा (2)

एकारूपा चैकाक्षर्येकानेकाक्षराकृतिः
ऐतत्तदित्यनिर्द्देश्या चैकानन्दचिदाकृतिः
एवमित्यागमाबोद्ध्या चैकभक्तिमदर्च्चिता
एकाग्रचित्तनिर्द्ध्याता चैषणारहितादृता (3)

एलासुगन्धिचिकुरा चैनःकूटविनाशिनी
एकभोगा चैकरसा चैकैश्वर्यप्रदायिनी
एकातपत्रसाम्राज्यप्रदा चैकान्तपूजिता
एधमानप्रभा चैजदनेक जगदीश्वरी (4)

एकवीर्यादिसंसेव्या चैकप्राभवशालिनी
ईकाररूपिणीशित्री चेप्सितार्त्थप्रदायिनी
ईदृगत्यविनिर्द्देश्या चेश्वरत्वविधायिनी
ईशानादिब्रह्ममयी चेशित्वाद्यष्टसिद्धिदा (5)

ईक्षित्रीक्षणसृष्टाण्ड कोटिरीश्वरवल्लभा
ईडिता चेश्वरार्द्धांगक शरीरेशाधिदेवता
ईश्वरप्रेरणकरी ईशताण्डवसाक्षिणी
ईश्वरोत्सङ्गनिलया चेतिबाधाविनाशिनी (6)

ईहाविरहिता चेशशक्तिरीषल्स्मितानना
लकाररूपा लळिता लक्ष्मी वाणीनिषेविता
लाकिनी ललनारूपा लसद्दाडिमपाटला
लसन्तिका लसल्फाला ललाट नयनार्च्चिता (7)

लक्षणोज्ज्वलदिव्यांगी लक्षकोट्याण्डनायिका
लक्ष्यार्त्था लक्षणागम्या लब्धकामा लतातनुः
ललामराजदळिका लंबिमुक्तालताञ्चिता
लंबोदरप्रसूर्ल्लभ्या लज्जाढ्या लयवर्ज्जिता (8)

ह्रीङ्काररूपा ह्रीङ्कारनिलया ह्रींपदप्रिया
ह्रींकारबीजा ह्रींकारमन्त्रा ह्रींकारलक्षणा
ह्रींकारजपसुप्रीता ह्रींमती ह्रींविभूषणा
ह्रींशीला ह्रींपदाराध्या ह्रींगर्भा ह्रींपदाभिधा (9)

ह्रींकारवाच्या ह्रींकारपूज्या ह्रींकारपीठिका
ह्रींकारवेद्या ह्रींकारचिन्त्या ह्रीं ह्रींशरीरिणी
हकाररूपा हालधृत्पूजिता हरिणेक्षणा
हरप्रिया हराराद्ध्या हरिब्रह्मेन्द्रवन्दिता (10)

हयारूढा सेवितांघ्रिर् हयमेधसमर्च्चिता
हर्यक्षवाहना हंसवाहना हतदानवा
हत्यादि पापशमनी हरिदश्वादिसेविता
हस्तिकुंभोत्थुंगकुचा हस्तिकृत्तिप्रियांगना (11)

हरिद्राकुङ्कुमादिग्धा हर्यश्वाद्यामरार्च्चिता

हरिकेशसखी हादिविद्या हालामदालसा
सकाररूपा सर्व्वज्ञा सर्वेशी सर्व्वमंगळा
सर्व्वकर्त्री सर्व्वभर्त्री सर्व्वहन्त्री सनातना (12)

सर्व्वानवद्या सर्व्वांगसुन्दरी सर्व्वसाक्षिणी
सर्व्वात्मिका सर्व्वसौख्यदात्री सर्व्वमोहिनी
सर्व्वाधारा सर्व्वगता सर्व्वावगुणवर्ज्जिता
सर्व्वारुणा सर्व्वमाता सर्व्वभूषणभूषिता (13)

ककारार्त्था कालहन्त्री कामेशी कामितार्त्थदा
कामसञ्जीविनी कल्या कठिनस्तनमण्डला
करभोरुः कलानाथमुखी कचजितांबुदा
कटाक्षस्यन्दिकरुणा कपालिप्राणनायिका (14)

कारुण्यविग्रहा कान्ता कान्तिधूतजपावलीः
कलालापा कंबुकण्ठी करनिर्ज्जितपल्लवा
कल्पवल्लीसमभुजा कस्तूरितिलकाञ्चिता
हकारार्त्था हंसगतिर् हाटकाभरणोज्ज्वला (15)

हारहारिकुचाभोगा हाकिनी हल्यवर्ज्जिता
हरित्पतिसमाराध्या हठात्कारहतासुरा
हर्षप्रदा हविर्भोक्त्री हर्द्दस्यन्तमसापहा
हल्लीसलास्य सन्तुष्टा हंसमन्त्रार्त्थरूपिणी (16)

हानोपादाननिर्मुक्ता हर्षिणी हरिसोदरी
हाहा हूहू मुख स्तुत्या हानिवृद्धिविवर्ज्जिता
हर्यंगवीन हृदया हरिकोपारुणांशुका
लकाराख्या लतापूज्या लयस्तित्युद्भवेश्वरी (17)

लास्यदर्शनसन्तुष्टा लाभालाभविवर्ज्जिता
लंघ्येतराज्ञालावण्यशालिनी लघुसिद्धिता
लाक्षारससवर्ण्णाभा लक्ष्मणाग्रजपूजिता
लभ्येतरा लब्धभक्तिसुलभा लांगलायुधा (18)

लग्नचामरहस्तश्री शारदापरिजीविता
लज्जापदसमाराद्ध्या लम्पटा लकुलेश्वरी
लब्धमाना लब्धरसा लब्धसम्पत्समुन्नधिः

ह्रीङ्कारिणी ह्रीङ्कारादिः ह्रींमद्ध्या ह्रींशिखामणिः (19)

ह्रींङ्कारकुण्डाग्निशिखा ह्रींकारशशिचन्द्रिका
ह्रींकारभास्कररुचिः ह्रींकारांभोदचञ्चला
ह्रींकारकुन्दाङ्कुरिका ह्रींङ्कारैकपरायणा
ह्रींकारदीर्घकाहंसी ह्रींकारोद्यानकेकिनी (20)

ह्रींकारारण्यहरिणी ह्रींङ्कारावालवल्लरी
ह्रींङ्कारपञ्चरशुकी ह्रींकारांगणदीपिका
ह्रींकारकन्दरा सिंही ह्रींकारांभोजभृंगिका
ह्रींकारसुमनो माध्वी ह्रींकारतरुमञ्जरी (21)

सकाराख्या समरसा सकलागमसंस्तुता
सर्व्ववेदान्ततात्पर्यभुवी सदसदाश्रया
सकला सच्चिदानन्दा साद्ध्या सद्गतिदायिनि
सनकादिमुनिध्येया सदाशिवकुटुंबिनी (22)

सकलाधिष्ठानरूपा सत्यरूपा समाकृतिः
सर्व्वप्रपञ्च निर्म्मात्री समानाधिक वर्ज्जिता
सर्व्वोत्तुंगा संगहीना सगुणा सकलेष्टदा
ककारिणी काव्यलोला कमेश्वरमनोहरा (23)

कामेश्वरप्राणनाडी कमेशोत्संगवासिनी
कामेश्वरालिंगितांगी कमेश्वरसुखप्रदा
कामेश्वरप्रणयिनी कामेश्वरविलासिनी
कामेश्वरतपःसिद्धिः कामेश्वर मनःप्रिया (24)

कामेश्वरप्राणनाथा कामेश्वरविमोहिनि
कामेश्वरब्रह्मविद्या कामेश्वरगृहेश्वरि
कामेश्वराह्लादकरी कामेश्वरमहेश्वरी
कामेश्वरी कामकोटिनिलया कांक्षितार्त्थदा (25)

लकारिणी लब्धरूपा लब्धधीर्ल्लब्धवाञ्छिता
लब्धपापमनोदूर लब्धाहङ्कारदुर्ग्गमा
लब्धशक्तिर्ल्लब्धदेहा लब्धैश्वर्यसमुन्नतिः
लब्धवृद्धिर्ल्लब्धलीला लब्धयौव्वनशालिनि (26)

लब्धातिशय सर्व्वांगसौन्दर्या लब्धविभ्रमा
लब्धरागा लब्धपतीः लब्धनानगमस्थितिः
लब्धभोगा लब्धसुखा लब्धहर्षाभिपूजिता
ह्रिंकारमूर्त्तिर् ह्रींकारसौधशृंगकपोतिगा (27)

ह्रींकारदुग्द्धाब्धिसुता ह्रींकारकमलेन्दिरा
ह्रींकारमणिदीपार्च्चिर् ह्रींकारतरुशारिका
ह्रींकारपेटकमणीर् ह्रींकारादर्शबिंबिता
ह्रींकारकोशासिलता ह्रींकारास्थान नर्त्तकी (28)

ह्रींकारशूक्तिकामुक्तामणिर् ह्रींकारबोधिता
ह्रींकारमय सौवर्ण्ण स्तंभविद्रुमपुत्रिका
ह्रींकारवेदोपनिषद्ध्रींकाराद्ध्वरदक्षिणा
ह्रींकारनन्दनाराम नवकल्पकवल्लरी (29)

ह्रींकारहिमवद्गंगा ह्रींकारार्ण्णवकौस्तुभा
ह्रींकारमन्त्रसर्व्वस्वा ह्रींकारपरसौख्यदा (30)

*इति ब्रह्माण्डपुराणे हयग्रीवागस्त्यसंवादे श्री लळिता त्रिशती स्तोत्रं समाप्तं*